श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीश्रीनिवासकवि कृतं

# ॥ श्रीरामभद्रमङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरामभद्रमङ्गळाशासनम् ॥

शरणागतसन्त्राणनिपुणाय महात्मने।
अयोध्याजनभाग्याय रामभद्राय मङ्गळम्॥ १ ॥

कौसल्यानन्द कन्दाय कल्याणगुणसिन्धवे।
शरण्याय वरेण्याय रामभद्राय मङ्गळम्॥ २ ॥

कौशिकाख्य महायोगि सन्देशसफलीकृतौ।
कृतिने नतितुष्टाय रामभद्राय मङ्गळम्॥ ३ ॥

वैदेहीवदनाम्भोज लोलम्बायितचेतसे।
भद्राणामपि भद्राय रामभद्राय मङ्गळम्॥ ४ ॥

गौतमाश्रम साफल्य निदानपदपांसवे।
दाशकीशादिमित्राय रामभद्राय मङ्गळम्॥ ५ ॥

महापातकनिर्मुक्त हेतुसेतुविधायिने।
शिक्षिताशरजालाय रामभद्राय मङ्गळम्॥ ६ ॥

विभीषण परित्राण संहृष्टमनसेऽनिशम्।
प्राप्तसीताय रामाय रामभद्राय मङ्गळम्॥ ७ ॥

प्राप्तराज्याय रामाय भरताभीष्ट दायिने।
सर्वबन्धु समेताय रामभद्राय मङ्गळम्॥ ८ ॥

श्रीनिवास कवीन्द्रोक्तं सीतावल्लभ मङ्गळम्।
ये पठन्ति महात्मानस्तेषां भूयात्तु मङ्गळम्॥ ९ ॥

॥ इति श्रीरामभद्रमङ्गळाशासनं समाप्तम् ॥

www.prapatti.com